दैनिकं ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ताः

हिमाचलप्रदेशस्य संस्कृतशिक्षकाणां नूतनः प्रकल्पः

himsanskritvartah
e-Sanskritnewspaper
नवा प्रेरणा नवोत्साहः

■ पृष्ठ-4 ■ वर्ष-3 ■ अङ्क-70

1

03.01.2024 बुधवासरः वि.सं. २०८० पौषकृष्णः सप्तमी पौषः 19 प्रविष्ठांशः

Website- www.himsanskritam.com Email-himsanskrit@gmail.com




हिमाचले पेट्रोल-डीजल-ईन्धनयोः कृते हाहाकारः ८० प्रतिशत-शिलातैलकेन्द्राणि रिक्तानि 2

पीएलआई इत्यस्य समयावधिः आंशिक-संशोधनैस्साकं वर्षात्मकं यावत् विवर्धितः 3



लङ्काकाण्डम् (चतुष्पञ्चाशत्तमः सर्गः) रावणे निहते विभीषणस्य मन्दोदर्याः च विलापः (द्वितीयः खण्डः) 4



## तमिलनाडोः तिरुचिरापल्ल्यां विंशति- सहस्र-कोट्यधिक-रूप्यकाणां अधिकानां बहवः विकास-परियोजनानां लोकार्पणं-शिलान्यासः




प्रधानमन्त्रिणा- नरेन्द्रमोदिना तमिलनाडोः तिरुचिरापल्ल्यां विंशति- सहस्र- कोट्यधिक-रूप्यकाणां अधिकानां बहवः विकास-परियोजनानां लोकार्पणं-शिलान्यासो च विहितः। एतासां परियोजनानां विमानन-रेल-मार्ग-तैल वाति जलपोत-उच्च-शिक्षा- सम्बद्ध-परियोजना- समाविष्टाः सन्ति । तेन तिरुचिरापल्ली-अन्ताराष्ट्रिय-विमानन्पत्तने -सहस्राधिक-कोट्यधिक-रूप्यकाणां विनिर्मित- टर्मिनल भवनस्यापि समुद्घाटनं विहितम्। अवसरेऽस्मिन् प्रधानमन्त्रिणोक्तं यत् एताः सर्वाः परियोजनाः राज्यस्य विकासं सुदृढयिष्यन्ति, आर्थिक विकासं च विवर्धयिष्यन्ति। एतस्मात् राज्यस्य बहवः युवकाः वृत्ति युताः भविष्यन्ति । इतः प्राक् श्रीमोदिना अद्य तिरुचिरापल्ल्यां भारती-दासन-विश्वविद्यालयस्य अष्टित्रिंशत् तमे दीक्षान्त समारोहे भागं ग्रहीतम्। अवसरेऽस्मिन् तेन भवितं यत् भारत देशः आर्थिक विकासस्य नूतन-कीर्तिमानः स्थापयति । तेन प्रतिपादितं यत् विगत दश-वर्षेषु विमान-पत्तनानां संख्या चतुस्सप्ततितः विवर्ध्य साधैक-शता संजाता। प्रधानमन्त्रिणा प्रोक्तं यत् भारतेन विश्वस्य महत्वपूर्ण-अर्थव्यवस्थाभिः साकं बहवः व्यापारिक-संधिः अपि प्रमाणीकृताः।

प्रधानमन्त्री अपराहणानन्तरं लक्षद्वीपम्प्रति अपि गमिष्यति। तत्र असौ अगत्ती-द्वीपे विभिन्न-प्राशासनिक - योजनाः संबोधिताः। श्वः असौ लक्षद्वीपस्य कवरत्त्यां सम्प्राप्स्यति। तत्र श्रीमोदी सार्ध-शताधिक-सहस्राधिक-भूरिशः विकास-परियोजनाः शिलान्यास-लोकार्पणं च करिष्यति। एतेषु दूरसंचार-पेयजल सौरोर्जा-स्वास्थ्य-सदृश- क्षेत्रेषु सम्बद्ध-एताः सर्वाः विकास परियोजनाः सम्मिलिताः सन्ति। प्रधानमंत्री अद्य केरल-राज्ये कोच्चाम्प्रति प्रस्थास्यति । तत्र त्रिशूरे द्वि-लक्षाधिक-महिलानां जनसभाः सम्बोधयिष्यति ।

## प्रधानमंत्रिणा नमोऐप-इत्यस्मिन् तन्त्रांशे जनमन-सर्वेक्षणार्थ संप्रार्थिताः जनाः



प्रधानमंत्रिणा श्रीनरेन्द्रमोदिना समेऽपि देशवासिनः नमोऐप-इत्यस्मिन् तन्त्रांशे जनमन-सर्वेक्षणार्थ संप्रार्थिताः, सहैव विगत दशवर्षेषु भारतेन समर्जिता प्रगतिः आलक्ष्यापि तत्र विचारान् व्यक्तीकर्तुं संबोधिताः। तेन सोशल मीडिया मध्ये हैशटैग जनमन-सर्वे इत्येतत् उपयुज्य साक्षात् स्वीय-प्रतिक्रियां तेन सह विनिमयीकर्तु प्रोदीरितम्। सर्वेक्षणं जनानां कृते देशस्य प्रगतिं विकासं च निध्याय स्वीयविचारान् विनिमयीकर्तु उत्कृष्ट-मञ्चः वर्तते ।

## निर्वाचन-सन्धेः विक्रयणं जनवरी-मासस्य एकादश-दिनांकं यावत् प्रचलिष्यति



निर्वाचन-सन्धेः विक्रयणं अद्य प्रभृति प्रारप्स्यति। एतानि पत्राणि जनवरी-मासस्य एकादश- दिनांकं यावत् भारतीय- स्टेट- बैंकस्य ऊनत्रिंशत् अधिकृत-शाखाभिः विक्रयणं भविष्यन्ति। एताः अधिकृत-शाखाः दिल्ली- हरियाणा- पञ्जाब- हिमाचल-प्रदेश- जम्मू- कश्मीर- उत्तराखंड-गुजरात- मध्यप्रदेश- राजस्थान-महाराष्ट्र- उत्तरप्रदेश- ओडिसा-बिहार- पश्चिम-बंगाल राज्येषु च स्थिताः सन्ति। वित्त-मन्त्रालयेन एकस्मिन् वक्तव्ये प्रतिपादितं यत् एतेषां सन्धिपत्राणां विक्रयस्य तृतीय-चरणे स्टेट बैंक निर्वाचन् सन्धि-पत्राणि- प्रसारण- तत्स्थानं धन-वितरणाय अधिकृतं नियोजितम्।

## प्रासङ्गिकवार्ता

## भूकम्पेन जापान-देशस्य अतिव्यापक-क्षतिः समभवत्- फुमियो किशिदा



जापाने तीव्रभूकम्पस्य कारणात् अधुना पर्यन्तम् अष्टचत्वारिंशत् जनाः मृत्युमुपगताः सन्ति। नूतनवर्षे होंशु इत्यस्य मुख्यद्वीपे इशिकावायां सप्त-दशमलव षट् तीव्रतायां भूकम्पः समापन्नः। जापानस्य प्रधानमन्त्रिणा फुमियो किशिदा इत्यमुना कथितं यत् भूकम्पेन अतिव्यापक-क्षतिः समभवत्। अनेन बहवः मार्गाः क्षतिग्रस्ताः संजाताः, देशस्य सर्वाधिक-प्रभावितक्षेत्रेषु सहस्रशः सैनिकाः प्रेषिताः सन्ति। जापानस्य ऋतुविज्ञान-विभागानुसारं परह्यः भूकम्पानन्तरं एतावता पर्यन्तं प्रायः पञ्चशदधिकैकशतं यावत् कम्पनम् अनूभूतम्। विभागेन सञ्चेतितं यत् आगामि दिनेषु इतोऽपि तीव्रकम्पनं भवितुं शक्यते।

## ट्रकचालकानां-कार्यावरोधः



भारतीय-न्याय-संहितायाः अन्तर्गतं हिट एंड रन प्रकरणे सप्तलक्षरूप्यकाणां अर्थदण्डः एवं दशवर्षस्य कारावासः इत्यस्य प्रावधानस्य विरोधे ट्रकचालकैः, टैक्सीचालकैः, बसचालकैश्च यः देशव्यापी कार्यावरोधः समारम्भितः। कार्यावरोधस्य द्वितीयदिवसे अद्य मुम्बईय्याः पेट्रोलस्थानकेषु अति-सम्मर्दः संदृष्टः । त्रिदिवसीय कार्यावरोधेन आवश्यक-फलशाकादीनां आपूर्तिः प्रभावितो भविष्यति इति सम्भाव्यते ।

## पञ्जाब-हरियाणा-उत्तर-प्रदेश-राजस्थानस्य उत्तरी भागेषु अग्रिम द्वि- दिवसात्मकं यावत् शीतप्रकोपः प्रभावी



भारतीय ऋतुविभागेन ऋतुविभागेन हिमाचल-प्रदेशे-मध्यप्रदेशे-बिहार-पश्चिम बंगाल-झारखंडे च भीषणातिभीषण-कुज्झिटिका-आच्छादनस्य संभावना अभिव्यक्ता अस्ति। पञ्जाब- हरियाणा-चंडीगढ-उत्तर-प्रदेश-उत्तरी-राजस्थाने च न्यूनतम तापमानः षड् दशमलवतः नव-डिग्री सेल्सियस इत्येतयोः मध्ये सन्धारणस्यानुमानः प्रकटितः। ऋतु-विभागेन उत्तरी- पश्चिम-पूर्वी-भारतस्य च केषुचित्-प्रदेशेषु आगामि- त्रिषु दिवसेषु भीषण- कुज्झटिका-आच्छादनस्य संभावना अभिव्यक्ता अस्ति।

हिमसंस्कृतवार्ताः

## सुभाषितम्

मूर्खस्य पञ्च चिन्हानि गर्वो दुर्वचनं तथा ।
क्रोधश्च दृढवादश्च परवाक्येष्वनादरः॥

भावार्थ - मूर्खों के पाँच लक्षण हैं - गर्व, अपशब्द, क्रोध, हठ और दूसरों की बातों का अनादर॥

सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुद्धिनां कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम् प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला, जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः- १७७१११

हिमसंस्कृतवार्ताः
दैनिक ई-संस्कृतवार्तापत्रम्
हिमाचलप्रदेशस्य संस्कृतशिक्षकाणां नूतनः प्रकल्पः
2
03.01.2024 बुधवासरः वि.सं. २०८० पौषकृष्णः सप्तमी पौषः 19 प्रविष्टांशः
Website- www.himsanskritam.com Email-himsanskrit@gmail.com

# हिमाचले पेट्रोल-डीजल-ईन्धनयोः कृते हाहाकारः ८० प्रतिशत-

## शिलातैलकेन्द्राणि रिक्तानि, हिमाचल- पथ- परिवहननिगमस्य निजीबसयानानां चक्राणि च स्थगितानि



**हिमसंस्कृतवार्ताः- कार्यालयीयः प्रतिनिधिः।** हिमाचलप्रदेशे अद्यत्वे पेट्रोल-डीजल-ईन्धनयोः कृते हाहाकारः जायमानः अस्ति। प्रदेशस्य ८० प्रतिशत-शिलातैलकेन्द्राणि रिक्तानि जातानि। हिमाचल- पथ- परिवहननिगमस्य निजीबसयानानां चक्राणि च स्थगितानि सन्ति। यातायातस्य सम्मर्दः वर्तते, तैलकम्पनयः तैलं पूरयितुं १४० टैंकरयानानि प्रेषितवत्यः। चालकानामान्दोलनेन हिमाचलप्रदेशे आक्रोशः उत्पन्नः अस्ति। गतदिवसे सायंकालपर्यन्तं एव अवशिष्टेषु शिलातैलकेन्द्रेषु तैलम् अवशिष्टम् आसीत्। पेट्रोलियमकम्पनयः स्ववाहनेषु, पेट्रोलपम्पसञ्चालकानां वाहनेषु च तैलस्य आपूर्तिं आरब्धवन्तः इति आश्रयस्य विषयः। पुलिसवाहनानि तान् अनुसृत्य गच्छन्ति।

हिमाचलस्य ट्रक-बस-सञ्चालकाः अपि 'हिट एण्ड रन' प्रकरणानाम् विषये मोटरवाहन-अधिनियमे कृतानां संशोधनानाम् विरुद्धं विरोधम् आरब्धवन्तः। राज्यस्य सीमेण्टकम्पनीनां एसीसी, अम्बुजा, अल्ट्राटेक् इत्येतेषां १०,८०० ट्रकसञ्चालकाः विरोध-प्रदर्शनम् आरब्धवन्तः। एते जनवरी ३ पर्यन्तं मार्गम् अवरुद्ध्य केन्द्रसर्वकारस्य विरोधं करिष्यन्ति। ट्रकसञ्चालकानां आन्दोलनस्य कारणेन वज्रचूर्णस्य (सीमेण्टस्य) आपूर्तिः स्थगिता अस्ति। अपरपक्षे सिरमौर-बिलासपुरयोः संचालकाः अपि विरोधरूपेण स्वस्य ४५० तः अधिकानि बसयानानि निक्षिप्तवन्तः। बिलासपुरे ३०५ बसमार्गाः सिरमौरे १६९ बसमार्गाः प्रभाविताः सन्ति। सुन्दरनगरे अपि एतादृशी स्थिति अस्ति। हिमाचलपथपरिवहननिगमस्य सुन्दरनगरस्य आगारेण अपि सर्वे मार्गाः स्थगिताः। सिरमौरनगरस्य औद्योगिकक्षेत्रे काला-अम्बे अपि ५०० ट्रकयानानां चक्राणि स्थगितानि सन्ति। देशे सर्वत्र त्रिदिवसीय- आन्दोलनस्य कारणात् हिमाचले डीजल- पेट्रोल- पाक-गैसयोः संकटः वर्तते ।

### डीजल-पेट्रोलस्य कृते पङ्क्त्यः

तैलस्य आपूर्तेः अनुपलब्धतायाः कारणात् शिलातैलकेन्द्रेषु डीजलस्य, पेट्रोलस्य च पङ्क्तयः निर्मीयन्ते। नववर्षस्य अवसरे राज्यं द्रष्टुं आगताः पर्यटकाः स्वगृहं प्रत्यागन्तुं वाहनस्य ईंधनं न प्राप्नुवन्ति। न्यूनस्य भण्डारस्य कारणात् शिलातैलकेन्द्रेषु पर्याप्तं तैलं न प्राप्यते। हिमाचलपथपरिवहननिगमस्य (HRTC) आगारेषु अपि तैलस्य अभावः अस्ति। अनेकेषु आगारेषु नाममात्रस्य भण्डारः अवशिष्टः अस्ति। यदि एकदिनद्वयेन वा आपूर्तिः न आगच्छति तर्हि सर्वकारीयबसयानानि अपि स्थगितानि भविष्यन्ति। तैलस्य अभावात् परिवहननिगमः मंगलवासरात् आरभ्य मार्गेषु क्लबिंग कुर्वन् अस्ति। यत्र पूर्वं द्वौ बसयानौ प्रचलतः तस्मिन् मार्गे एकमैव यानं चालयितुं शक्यते येन तैलस्य रक्षणं कर्तुं शक्यते इति तात्पर्यम्।



# पुलिसमहानिदेशकः संजयकुण्डुः पदात् वारितः, आयुषविभागे अभवत् नियुक्ति

**हिमसंस्कृतवार्ताः- शिमला।** उच्चन्यायालयस्य आदेशान् अनुसृत्य राज्यसर्वकारेण पुलिसमहानिदेशकः संजयकुण्डुः पदात् वारितः। राज्यसर्वकारेण आईपीएस-अधिकारिणः संजयकुण्डोः पुलिसमहानिदेशकस्य पदात् निवारय अधुना आयुषविभागे प्रधानसचिवः नियुक्तः अस्ति। तस्मिन् एव काले पुलिसाधीक्षक काङ्गड़ा शालिनी अग्निहोत्री इत्यस्या विषये अधुनापि कोऽपि आदेशः न निर्गतः। राज्यस्य नूतनः पुलिसमहानिदेशकः कः भविष्यति इति विषये निर्णयः मंगलवासरस्य सायं यावत् कर्तुं शक्यते इत्यपेक्षासीत्। होटलव्यापारिणं निशांतशर्माणं धमनकृत्य सम्बद्धे प्रकरणे हिमाचल उच्चन्यायालयेन अधुनैव डीजीपी संजयकुण्डुः एसपी काङ्गड़ा शालिनी अग्निहोत्री च स्वपदात् निष्कासयितुं आदेशः दत्तः आसीत्। राज्यसर्वकारेण स्वस्य आदेशस्य अनुपालनप्रतिवेदनं हिमाचलप्रदेश- उच्चन्यायालये जनवरीमासस्य चतुर्थे दिनाङ्के दातव्यम् अस्ति।

उच्चन्यायालयस्य निर्देशानुसारं कार्मिकविभागेन मंगलवासरे प्रातःकाले डीजीपी संजयकुण्डुः पदात् निष्कासनस्य आदेशः प्रसारितः, संजयकुण्डुः नूतनप्रभारं स्वीकृत्य अमनदीपगर्गः आयुषविभागात् मुक्तः भविष्यति। सर्वोच्चन्यायालये हिमाचलप्रदेश उच्चन्यायालयस्य पदात् निष्कासनस्य आदेशं आईपीएस अधिकारी संजयकुण्डुः प्रार्थितवान्। परन्तु अयं प्रकरणः अद्यापि सर्वोच्चन्यायालये सूचीकृतः नास्ति। आईपीएस- अधिकारिणः संजयकुण्डु-महोदयस्य डीजीपी-पदात् त्यागपत्रस्य अनन्तरं पुलिसविभागस्य प्रमुखस्य कृते प्रभावकार्यं तीव्रं जातम्। नवीन डीजीपी हेतु १९८९ बैच आईपीएस अधिकारी एस. आर. ओझा, १९९० बैच आईपीएस अधिकारी श्याम भगत नेगी, १९९२ बैच आईपीएस अधिकारी अतुल वर्मा इत्येतेषां नामानि चर्चायां वर्तन्ते।



## पुलिसमहानिदेशकस्य संजयकुण्डुवर्यस्य याचिकायां सर्वोच्चन्यायालये अद्य भविष्यति श्रवणम्

**हिमसंस्कृतवार्ताः- कार्यालयीयः प्रतिनिधिः।** हिमाचल उच्चन्यायालयस्य आदेशस्य अनन्तरं राज्यसर्वकारेण डीजीपी संजयकुण्डुः पदात् निष्कासितः अस्ति। सर्वकारेण कुण्डुः डीजीपीपदात् निष्कास्य आयुषविभागे प्रधानसचिवः नियुक्तः। तस्मिन् एव काले संजयकुण्डुः सर्वोच्चन्यायालये डीजीपीपदात् निष्कासयितुं हिमाचल-उच्चन्यायालयस्य निर्णयस्य विरुद्धं याचिकायाः शीघ्रं श्रवणं कर्तुम् अनुरोधं कृतवान् आसीत्। मंगलवासरे मुख्यन्यायाधीशः डी. वाई. चन्द्रचूडस्य, न्यायाधीशः जे. बी. पारदीवाला न्यायमूर्ति मनोजमिश्रा च एतेषां पीठे शीघ्रं श्रवणं कर्तुं याचिकां स्वीकृत्य तृतीये दिनांके श्रवणं सूचीकृतमस्ति। वरिष्ठ अधिवक्ता मुकुलः रोहतगी पीठस्य समक्षं 'विशेषोल्लेखस्य' संदर्भे पक्षमुपस्थापितवान्। उच्चन्यायालयेन याचिकाकर्तुः स्थानान्तरणस्य आदेशः तस्य पक्षस्य सम्यक् श्रवणं न कृत्वा पारितः इति विश्वासं कृत्वा याचिकायाः तत्कालं श्रवणं भवतु इति प्रार्थितवान्। अधुना सर्वोच्चन्यायालयः जनवरीमासे ३ दिनाङ्के बुधवासरे अस्य विषयस्य श्रवणं करिष्यति।

# मुख्यमन्त्रिणा पर्यटननगर्य्यां मनाल्यां कृतं शीतकालीनकार्निवालस्य शुभारम्भः

**हिमसंस्कृतवार्ता-मनाली।** मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः कुल्लूमण्डलस्य मनालीनगरे पञ्चदिवसीयस्य राष्ट्रियस्तरस्य शीतकालीनकार्निवलस्य उद्घाटनं कृतवान् । ऐतिहासिकहिडिम्बामन्दिरे प्रार्थनां कृत्वा सः परिधिगृहमनालीतः कार्निवलसंचलनं ध्वजं प्रदर्श्य प्रेषितवान्। हिमाचलप्रदेशस्य एवं अन्यराज्येभ्यः २५० तः अधिकानि महिलादलानि, सांस्कृतिकदलानि च अस्मिन् संचलन-कार्यक्रमे भागं गृहीतवन्तः । सांस्कृतिकसमूहाः सामाजिकसन्देशः, संस्कृतिः, परम्पराः च आधारिताः आकर्षककार्यक्रमाः प्रस्तुतवन्तः। सुखविन्दरसिंहसुक्खुः मनुरंगशालायां दीपप्रज्ज्वालनं कृत्वा सांस्कृतिककार्यक्रमाणाम् उद्घाटनम् अकरोत्। शिशिरकार्निवालस्य आयोजने विभिन्नराज्येभ्यः २५ सहभागिनः समूहाः भागं गृह्णन्ति । महिलामण्डलैः, विभागैः, संस्थाभिः च बहिः आनयितानां फलकानाम् विषये सः तीव्ररुचिं दर्शितवान् । अस्मिन् अवसरे विशालं जनसभां सम्बोधयन् मुख्यमन्त्री महिलामण्डलेभ्यः प्रदत्तां 'प्रोत्साहनराशिं' २० सहस्ररूप्यकात् २५ सहस्ररूप्यकाणि यावत् वर्धयितुं घोषणां कृतवान्। एतदतिरिक्तं मनालीनगरे १५ माइलसमीपे नूतनसेतुनिर्माणार्थं १० कोटिरूप्यकाणां प्रावधानमपि घोषितम् । सः अवदत् यत् रोहताङ्ग-मनाल्यां पर्यटनहोटेलस्य नवीनीकरणं भविष्यति, विद्युत्-बोर्ड-भूमिषु पार्किङ्ग-करणस्य सम्भावनायाः अन्वेषणार्थं सर्वेक्षणम् अपि क्रियते इति। एतदतिरिक्तं सः निकटभविष्यत्काले मनालीनगरे स्कीइंग् कार्यक्रमस्य आयोजनमपि कर्तुं घोषितवान् ।



# गुजरातराज्यस्य जूनागढ़ जनपदस्य पीएम श्रीनवागामप्राथमिक-शालायां 'विकसितभारतसंकल्पयात्रा' इति कार्यक्रमः समायोजितः

**हिमसंस्कृतवार्ताः- जगदीश डाभी, जूनागढ़।**
प्राप्तवार्तानुसारं जनवरीमासस्य दिनांके गुजरातराज्यस्य जूनागढ़ जनपदस्य पीएम श्रीनवागामप्राथमिकशालायां 'विकसितभारतसंकल्पयात्रा' इति कार्यक्रमः समायोजितः। अस्मिन् समारोहे केन्द्रस्य, राज्यस्य च वित्तमंत्री भागवतसिंहकराडेमहोदयः, जूनागढ़ जनपदस्य सांसदः राजेश चुडासमावर्यः, मेतर महोदयः, अनकभाई, जूनागढ़- कलेक्टरमहोदयः, जूनागढ़ डी. डी. ओ. महोदय, जूनागढ़जनपद- प्राथमिकशिक्षणाधिकारी, तालुका-पंचायत- प्रमुख, सदस्यः, तालुका-प्राथमिक-शिक्षणाधिकारी, ग्रामजनाः, शालायाः छात्राः, शिक्षकाश्च समुपस्थिताः आसन्। कार्यक्रमे सर्वकारस्य विविधयोजनानां लाभार्थिनः तेषां प्राप्तलाभानां विषये सूचनां दत्तवन्तः।





# दक्षिण अफ्रीकायां भारतस्य द्वितीया परीक्षा अभ्यासक्रिकेटश्रृंखलायाः द्वितीया प्रतिस्पर्धा अद्य केपटाउननगरस्य न्यूलैंड्स क्रीडांगणे प्रथमां स्पर्धां विजित्य श्रृंखलायां दक्षिण-अफ्रीका 1-0तः अग्रे




**हिमसंस्कृतवार्ताः- डॉ. अमित शर्मा।** भारतस्य दक्षिण अफ्रीकादेशस्य यात्रायाम् अद्य टेस्ट क्रिकेट श्रृंखलायाः द्वितीया स्पर्धा प्रारभ्यते। इयं स्पर्धा केपटाउन नगरस्य न्यूलैंड्स इति क्रीडांगणे भविष्यति। श्रृंखलायाः प्रथमां प्रतिस्पर्धां विजित्य दक्षिण अफ्रीकादलं 1-0तः अग्रे अस्ति। ध्यातव्यमस्ति यत् प्रथमस्पर्धायां दक्षिण अफ्रीकादलेन भारतं पाली 32 धावनांकैश्च पराजितम्। द्वितीये द्वंद्वे भारतं किमपि अधिकं प्रदर्शनं कर्तुं प्रयतिष्यते। इतिहासे दक्षिण अफ्रीकादेशे भारतस्य प्रदर्शनम् उत्तमं नास्ति। अतः रोहित शर्मणः नेतृत्वे अस्मिन् प्रदर्शने परिवर्तनस्य अपेक्षा अस्ति।

# पीएलआई इत्यस्य समयावधिः आंशिक-संशोधनैस्साकं वर्षात्मकं यावत् विवर्धितः



प्रशासनेन ऑटोमोबाइल-ऑटो-उपकरणानां उत्पादन-आधारित-प्रोत्साह-योजना- पीएलआई इत्यस्य समयावधिः आंशिक-संशोधनैस्साकं वर्षात्मकं यावत् विवर्धितः। उत्पादन-आधारित-प्रोत्साहन योजना-वित्त-वर्ष विगत- प्रवर्तमान-वर्षात् च समारभ्य पञ्च-वित्त-वर्षाणि यावत् प्रभावि-भविष्यति । प्रोत्साहन-लाभः अग्रिम-वित्त- वर्ष- प्रवर्तमान- आगामि-वर्षे च प्राप्स्यति । योजनानुसारेण आर्वेदकः क्रमेण पञ्च-वित्त- वर्षेभ्यः लाभस्य पात्रो भविष्यति, मार्च-अंतिमेदिवसे अष्टाविंशत्युत्तर- द्विसहस्त्रतमं वर्ष, वित्तीयवर्षात्-अधिका तस्य पात्रता-नैव भविष्यति । प्रथम-वर्ष निर्धारित- सीमातः अधिक विक्रयणे विफलतायाः स्थितौ अनुमोदित-समवायस्य प्रोत्साहनं तं नैव प्राप्स्यति। मन्त्रालयेन प्रतिपादितं यत् संशोधनं अधिक स्पष्टरूपेण भूतकारणात् ऑटोमोबाइलक्षेत्रं अग्रे सरति, एतस्मात् क्षेत्रेऽस्मिन् विकासोन्मुखी-प्रतिस्पर्धी निर्माणस्य सम्भावना अधिका भविष्यति

# २०२४ तमस्य वर्षस्य द्वितीयदिने रक्तचिह्ने विपणिः स्थगितः सेन्सेक्सः ३७९ अंकैः पतितः निफ्टी च २१७०० अंकैः अधः आगतः



**हिमसंस्कृतवार्ताः- दिलीपः, नादौनम्**
२०२३ तमस्य वर्षस्य अन्तिमे मासे शेयरविपणिः निरन्तरं सर्वकालिक-उच्चतमं स्तरं प्राप्तवान् आसीत् ततः परम् अधुना नूतने वर्षे विपण्यां दृश्यते यत् २०२४ तमस्य वर्षस्य नववर्षस्य द्वितीये व्यापारदिने प्रमुखाः भारतीयाः बेन्चमार्कसूचकाङ्काः रक्तवर्णेन सह स्थगिताः अभवन्। अस्मिन् काले सेन्सेक्सः ७१,८९२.४८ स्तरस्य ३७९.४६ (-०.५२%) अंकैः न्यूनः अभवत्, निफ्टी ७६.११ (०.३५%) अंकैः स्खलितः भूत्वा २१,६६५.८० स्तरे स्थगितः अभवत्।

## भारतीयः विपणौ सुवर्ण- रजतयोः स्थितिः

मङ्गलवासरे २०२४ तमस्य वर्षस्य जनवरीमासस्य ०२ दिनाङ्के भारतीय-बुलियन-विपण्ये सुवर्ण-रजतयोः मूल्ययोः महत्त्वं जातम्। अधुना सुवर्णस्य मूल्यं प्रति १० ग्राम् ६३००० तः परम् अस्ति। तस्मिन् एव काले रजतस्य मूल्यं प्रतिकिलो ७४००० तः अधिकं अभवत्। विगते दिवसे राष्ट्रीयस्तरस्य ९९९ शुद्धतायाः २४ कैरेट सुवर्णस्य १० ग्रामस्य मूल्यं ६३५४४ रुप्यकाणि आसीत्।

## डॉलर समक्षं रूप्यकः

अन्तरबैङ्क विदेशी विनिमयविपण्यां अमेरिकीडॉलरस्य विरुद्ध रुप्यकस्य मूल्यं ८३.२८ इति मूल्ये प्रारब्धम्।

# पहाडपुर प्रखंडस्य मनकररीया इत्यत्र 'प्रत्येकं गृहे अक्षतः' वितरितः



**हिमसंस्कृतवार्ताः, कुणाल कौशिकः।** 2 जनवरीतः मनकररीया प्रखण्डस्य सर्वेषु ग्रामेषु अक्षतरूपेण क्षेत्रस्य सर्वेषु हिन्दूपरिवारेषु वितरिरं क्रियते। प्रसन्नतायाः विषयोऽस्ति यत् अयोध्यातः सम्पूजितः अक्षतः प्रखण्ड पहाडपुरम्, पोस्ट मनकररीया ग्राम बिसही इत्यत्र आगतः, तस्य पुंजीकरणस्य कार्यं 108 शिवलिंगमंशापूर्णमहादेव मंदिरं बिसही इत्यत्र प्रचलति। सप्तत्रिंशत् सहस्र मितानि पुटकानि समस्ते पहाडपुरप्रखंडे वितरितानि भविष्यन्ति। प्रखण्डस्य अध्यक्षः नगनारायण सिंहः,अनुमंडल कार्यकारिणी अध्यक्षः दीपक तिवारी 108 शिवलिंगमंशापूर्णमहादेवमंदिरस्य महंतः श्रीशर्मादूबे,विवेक सिंहः, विकास सिंहः, अमन सिंहः, आदित्य सिंहः, अंकित सिंहः, सुभाष सिंहः, किशन सिंहः, शोभित दुबे, मनीष सिंहः, मुकेश सिंहः संहिताः शतशः अन्यकार्यकर्तारः उपस्थिताः आसन्।

# राज्यसभा-आसने-निर्वाचनाय अधिसूचना सम्प्रसारितास्ति- निर्वाचनायोगेन

दिल्ल्याः राज्यसभायाः त्रि, सिक्किम-राज्यस्य च एकस्मै राज्यसभा-आसने-निर्वाचनाय अधिसूचना सम्प्रसारितास्ति। नामांकन- पत्राणि मासेऽस्मिन् नव दिनांकं यावत् प्रपूरयिष्यन्ति। मतदानञ्च ऊनविंशतितमे दिनांके भविष्यति। दिल्ल्याः आम-आदमी- पार्टीति-दलस्य राज्यसभा सदस्यानां संजय सिंहस्य, सुशील कुमार-गुप्तायाः, नारायण- दास-गुप्तायाः च कार्यकालं मासेऽस्मिन् एव समाप्तिम्प्रति यास्यति। सिक्किम- राज्यस्य सिक्किम-लोकतान्त्रिक मोर्चा इत्यस्य दलस्य सदस्य हिशे-लाचुंगपायाः कार्यकालं अग्रिमे मासे प्रपूरयिष्यति।




# ।। श्रीरामायणकथा ।।

## लङ्काकाण्डम् (चतुष्पञ्चाशत्तमः सर्गः) रावणे निहते विभीषणस्य मन्दोदर्याः च विलापः (द्वितीयः खण्डः)

हे प्रभो! मैथिलीसङ्गमम् अप्राप्य हि तस्याः पतिव्रतया तपसा च नूनं त्वं दग्धः असि। यदा त्वं जानकीम् अधर्षः तदा त्वं दग्धः न अभवः कारणं सेन्द्राः देवाः त्वत् बिभ्यति स्म। पर्यगते काले कर्ता पापकर्मणः फलम् अवश्यमेव लभते इत्यत्र संशयः नास्ति। शुभकृत् शुभम् आप्नोति पापकृत् पापम् अश्नुते। विभीषणः तु सुखम् अवाप्नोत् परन्तु त्वम् ईदृशं पापम् अवाप्नोः। सीतानिमित्तं त्वया दूरात् मृत्युः उपाहृतः, किन्तु अधुना सीता तु विशोका रामेण सह विहरिष्यति। अहमेव अल्पपुण्या यस्मात् शोकसागरे पतिता अभूवम्। अहं तथा किम् अकरवं किं च पापम् अकरवं यस्मात् त्वं मां न भाषसे? इत्येवं विलपन्ती मन्दोदरी रावणस्य मृतशरीरे पतित्वा मोहम् अगच्छत्। मन्दोदर्याः तां दशां दृष्ट्वा रुदत्यः सपत्न्यः सर्वाः तां भृशं रुदतीं मन्दोदरीं समुत्थाप्य वचनम् अब्रुवन् हे देवि! लोकानां स्थितिः अनित्या इति भवती न जानाति? विशेषतः भाग्यविपर्याये राज्ञां चञ्चलाः श्रियः एवमेव भवन्ति। इत्येवम् उक्त्वा ताः सर्वाः अपि रुदन्ति स्म।

एतस्मिन्नन्तरे श्रीरामः विभीषणं वचनम् अब्रवीत् हे राक्षसश्रेष्ठ! शीघ्रं भ्रातुः संस्कारः क्रियतां स्त्रीगणः च परिसान्त्व्यताम्। ततः विभीषणः अब्रवीत् प्रभो! एतं त्यक्तधर्मव्रतं क्रूरं नृशंसम् अनृतं परदाराभिमर्शनं संस्कर्तुं नार्हामि। सः मम भ्राता आसीत् किन्तु सर्वदा हि सः शत्रुवद् अहितकार्ये रतः आसीत्। गुरुगौरवात् सः मम पूज्यः अस्ति चेदपि रावणः मत्कृते पूज्यः नास्ति। हे राघव! प्रथमं तु जनाः मां नृशंसं वक्ष्यन्ति किन्तु अनन्तरं तस्य अगुणान् श्रुत्वा सर्वे पुनः मां सुकृतं वक्ष्यन्ति।

विभीषणस्य तद् वचनं श्रुत्वा धर्मभृतां वरः परमप्रीतः श्रीमान् रामः अब्रवीत् हे राक्षसेश्वर! भवतः प्रभावात् मया जितम् अतः भवतः यद् हितं भवेत् तदेव वदामि। कामम् एषः निशाचरः अधर्मसंयुक्तः, परन्तु सङ्ग्रामेषु नित्यशः बलवान् शूरः अत्यन्तं तेजस्वी च आसीत्। एषः महात्मा बलसम्पन्नः रावणः सुरैरपि पराजितः न श्रूयते। मृत्युपर्यन्तं हि शत्रुता, इदानीं तु तेन सह मम शत्रुतायाः प्रयोजनं नास्ति। अतः हे महाबाहो! शीघ्रं विधिपूर्वकम् अस्य संस्कारः क्रियताम्, धर्मेण भवान् यशोभाग् भविष्यति।




हिमसंस्कृतवार्ता, ✍प्रदीपः
pradipnath997@gmail.com

राघवस्य वचनं श्रुत्वा त्वरमाणः विभीषणः हतं भ्रातरं रावणं संस्कारयितुं लङ्कापुरीं प्रविश्य रावणस्य अग्निहोत्रं सत्त्वरं निर्यापयति स्म। सः शकटान्, दारुपात्राणि, अग्नीन्, याजकान्, विविधानि चन्दनकाष्ठानि, सुगन्धीनि अगुरूणि, गन्धान् सुरभीन्, मणिमुक्ताप्रवालानि च निर्यापयति स्म। ततः विभीषणः मुहूर्तेन राक्षसैः परिवारितः भूत्वा माल्यवता सह तस्मिन् कार्ये संलग्नः अभवत्। राक्षसाः मृतराक्षसराजं रावणं क्षौमवस्त्रं धारयित्वा सौवर्णीं दिव्यां शिबिकाम् आरोपयन्। तां शिबिकाम् उत्क्षिप्य दक्षिणाभिमुखाः सर्वे काष्ठानि गृहीत्वा गच्छन्ति स्म। तेषाम् अग्रे अग्रे विभीषणः गच्छति स्म। ततः अन्तःपुरात् रुदत्यः ताः सर्वाः नार्यः तेषां पृष्ठतः अनुयान्ति स्म।

भृशं दुःखिताः ते राक्षसाः रावणं पवित्रे स्थाने स्थापयित्वा वेदोक्तविधानानुसारं चन्दनकाष्ठैः चितायाः निर्माणम् अकुर्वन्। ततः राक्षसराजं तस्यां चितायां स्थापयित्वा विभीषणः विधिपूर्वकम् अग्निम् अददात्। तदनन्तरं सः विभीषणः स्नात्वा आर्द्रवस्त्रेण हि दर्भमिश्रितान् तिलान् प्रदाय राक्षसराजस्य ताः सर्वाः पत्नीः अत्यन्तं विनयेन गम्यताम् इति पुनः पुनः असान्त्वयत्। ततः ताः सर्वाः स्त्रियः नगरं प्राविशन्। स्त्रीषु नगरं प्रविष्टासु राक्षसेन्द्रः विभीषणः श्रीरामम् उपगम्य विनीतवद् अतिष्ठत्। ससुग्रीवः सलक्ष्मणः श्रीरामोऽपि तदा वृत्रं वासवः यथा रिपुं हत्वा अत्यन्तं हर्षम् अलभत। ततः वासवेन दत्तं सशरं शरासनं महत् कवचं च अमुञ्चत्। रिपुनिग्रहात् च श्रीरामः रोषं विमुच्य पुनः सौम्यत्वम् उपागच्छत्।

# आत्मौपम्येन सर्वत्र



जगति प्रत्येकं जनानां सुखं, दुःखं, लाभः, हानिः, जयः, पराजयः, रोगः, आरोग्यः इत्यादिभ्यः प्राप्तः अन्तःकरणस्थः अनुभवः समानः भवति । परेषां सुखदुःखादिकं यः आत्मनि अनुभवति स सत्पुरुषः कथ्यते । वस्तुतः स हि महात्मा आख्यायते, यः समस्तब्रह्माण्डे स्वकीयम् आत्मानं व्यापकं पश्यति । एकदेशीयम् अथवा शरीरे हि आत्मानं सीमिततया यः पश्यति स न महात्मा, अपितु अल्पात्मा उच्यते । एतादृशः अल्पात्मा पुरुषः, महात्मा इव समस्तप्राणिषु स्थितं सुखदुःखादिकम् अनुभवितुं न शक्नोति । तस्मिन् सहानुभूतिः, समवेदना इत्यादीनां महतां गुणानां नितराम् अभावः परिलक्ष्यते । समदर्शि-महापुरुषस्य विषये भगवता गीतायां प्रोक्तं यत् -

'सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि ।
ईक्षते योगयुक्तात्मा सर्वत्र समदर्शनः ।।' इति ।

इयं समदर्शितायाः स्थितिः, अथवा समतायाः अनुभवो भगवत्कृपातो हि सम्भवति । एतादृशस्य समभावस्य प्राप्त्यर्थं भगवत्स्मरणपूर्वकं सुदृढा साधना कर्तव्या । भक्तिसिद्धान्तानुसारम् - यदि अखिल संसारं हि भगवत्स्वरूपं मत्वा जगतः सततं हितसेवा आचर्यते, तर्ह्यपि शनैः अन्तःकरणे समताभावस्य जागरणं सम्भवति । गोस्वामी तुलसीदासो न्यगदत् -

'सो अनन्य जाके असि मति न टरै हनुमंत ।
मैं सेवक सचराचर रूप स्वामी भगवंत ।।' इति

✍असमप्रदेशीयः विज्ञानशिक्षकः, नारदोपाध्यायः

“जम्मू-कश्मीरमालक्ष्य उच्चस्तरीय- सुरक्षा- समीक्षोपवेशनं कृतं केन्द्रिय- गृहमन्त्रिणा अमितशाहेन।केन्द्रिय- गृहमन्त्री अमितशाहः जम्मू-कश्मीरमालक्ष्य उच्चस्तरीय- सुरक्षा-समीक्षोपवेशनस्य आध्यक्षं विधास्यति। उपवेशनमिदंम् नवदिल्ल्यां अभवत्। रक्षामन्त्रिणा राजनाथ- सिंहेन गतमासे पुंच्छजनपदे सैनिकानां वाहनोऽपरि आतंकवादिनाम् आक्रमणस्य समीक्षार्थं यात्रा कृता आसीत्। तस्मिन् चत्वारः सैनिकाः मृत्युमुपगताः। रक्षामंन्त्रिणा तत्र कथितमासीत् यत् एतासां घटनानां निराकरणार्थं पर्याप्तपदक्षेपाः सन्धारयिष्यन्ते।”

# भारतस्य अस्तित्वमेव संस्कृतकारणात् वर्तते- "प्रो. संजीवकुमारशर्मा"

## हल्द्वान्यां संस्कृतभारती-उत्तराञ्चलस्य कूर्मसम्भागे आवासीयप्रबोधनवर्गस्य शुभारम्भः







**उत्तराखण्ड**।संस्कृतभारती-उत्तराञ्चलस्य कूर्मसम्भागे श्रीराममन्दिरधर्मशालारेलवेबाजारहल्द्वानी इत्यत्र आवासीयप्रबोधनवर्गस्य आरम्भः जातः। कार्यक्रमस्य उद्घाटनं वैदिकमङ्गलाचरणेन दीपप्रज्वालनेन च अभवत्।अतिथिनां स्वागतं प्रान्तमन्त्री डॉ. चन्द्रप्रकाशः उप्रेतिः अकरोत्। उद्घाटनसत्रस्य मुख्यातिथिः महात्मा-गांधी-केन्द्रीय-विश्वविद्यालयस्य कुलपतिचरः प्रो. संजीवकुमारशर्मा उक्तवान् यत् संस्कृतभाषा सर्वभाषाणां जननी अस्ति, अत एव संस्कृतभारत्याः संस्कृतप्रचाराय कार्यं प्रशंसनीयम् अस्ति। सः अवदत् यत् संस्कृतं केवलं कर्मकाण्डस्य भाषा नास्ति। भारतस्य अस्तित्वमेव संस्कृतस्य कारणात् वर्तते। अतः अस्माभिः सर्वैः संस्कृतं वक्तुमभ्यासः वर्धनीयः ।विशिष्टातिथिः लालकुवांविधानसभायाः लोकप्रियः विधायकः डॉ. मोहनसिंहबिष्टः अवदत् यत् भवन्तः सौभाग्यशालिनः सन्ति यत् भवन्तः बहुदूरेभ्यः देवभाषासंस्कृतं ज्ञातुमागतवन्तः। संस्कृतम् अस्माकं वैभवम्, तस्य त्राणम् अस्माकं कार्यम्।विशिष्टातिथिरूपेण प्रसिद्धः वैद्यः डॉ. नीलाम्बरभट्टः स्वसम्बोधने उक्तवान् यत् संस्कृतम् अस्माकं मूलं वर्तते। तस्य रक्षणम् अस्माकं परमं कर्तव्यम् अस्ति।सारस्वतातिथिः सहायककेन्द्रीयपरिवहन-अधिकारी हल्द्वानीतः श्रीविमलपाण्डेयः आसीत्। तेनोक्तं यत् संस्कृतम् अस्माकं जीवनपद्धतिः वर्तते। यदि कश्चन्नपि कमपि विषयं यथाशीघ्रम् अवगन्तुं क्षमतां वर्धयितुम् इच्छति तर्हि प्रथमं संस्कृतम् अध्येतव्यम्।कार्यक्रमस्य अध्यक्षतां कुर्वती संस्कृतभारत्याः अध्यक्षा श्रीमती जानकी त्रिपाठी कुमाऊँ-मण्डलस्य छात्रान् अभिवादयन्ती संस्कृतस्य प्रचारस्य विषये चर्चां कृतवती। अस्मिन् अवसरे मञ्चस्य संचालनं डॉ. प्रकाशजाङ्गी इत्यनेन कृतम् ।प्रास्ताविकं सम्बोधनं प्रान्तमन्त्रिणा गिरीशचन्द्रतिवारीवर्येण विहितम् । कूर्म-संभागसम्पर्कप्रमुखाः श्रीमन्तः प्रकाशभट्टमहोदयाः सर्वेषामागतानां धन्यवादज्ञापनमकरोत्। अस्य वर्गस्य वर्गाधिकारी कैलाशपन्तमहोदयः सर्वेषां वर्गाभ्यर्थिनामभिनन्दनम् अकरोत्। शिविरस्य समाप्तिः जनवरी ०८ दिनाङ्के भविष्यति।अस्मिन् आवासीयप्रबोधनवर्गे ६० तः अधिकाः प्रशिक्षणार्थिनः प्रशिक्षणं गृह्णन्ति। अवसरेस्मिन् डॉ. गोपालदत्तत्रिपाठी, डॉ. जगदीशचंद्रपाण्डेय, नाजिया, अब्दुलः कविः, डॉ. नीरजजोशी, डॉ. कंचनतिवारी, डॉ. हेमंतजोशी, डॉ. मोहितजोशी, डॉ. कमलबेलवालः, डॉ. अभिषेकपरगाँई, डॉ. नवीनजोशी, डॉ. राजेन्द्रभट्टः, डॉ संजयभट्टः, श्री जगदीशः जोशी, मनोजपाण्डेयः, पंकजकपूरः, गीतिका तिवारी, आलोकटंडनः, भूपेशजोशी इत्यादयः कार्यकर्तारः उपस्थिताः आसन्।